कलियुगं, स्त्री, (कलिरेव युगम्। अमरे स्त्रियां पाठो ऽपि इति वत् कलेर्युगं वा।) चतुर्थयुगम्। (यथा मनुः १। ८५।
"अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः" ॥)
तस्योत्पत्त्यादि यथा। माघीपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः। तत्र अवतारः कल्किः। पुण्यमेकपादम्॥ पापं त्रिपादम्। गङ्गा तीर्थम्। ब्राह्मणो निरग्निः। अन्नगताः प्राणाः। सार्द्धत्रिहस्तपरिमितो मनुष्यदेहः। शताधिकशतवर्षं परमायुः। भोजनपात्रस्य नियमो नास्ति। इति कलियुगस्य लक्षणम्॥ कलियुगाब्दाः ४३२०००। आदौ कलिराजा धर्म्मपुत्त्रो युधिष्ठिरः। हरिश्चन्द्रः मुनिचन्द्रः तेजश्शेखरः विक्रमादित्यः विक्रमसेनः लाउसेनः बल्लालसेनः देवपालः भूपालः महीपालः। एते राजचक्रवर्त्तिनः॥
तन्माहात्म्यं यथा,—
'धर्म्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरं गतम्।
लोका धर्म्मरता द्विजाश्च लुभिता नारीवशा मानवाः'॥
तत्र तारकब्रह्मनाम।
"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे"।
इति केचित्॥

कलियुगाद्या, स्त्री, (कलियुगस्य आद्या आद्यतिथिः।) माघीपौर्णमासी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

कलिलः, त्रि, (कल्यते मिश्र्यते इति। "सलिकलि" उणां १। ५५। इति इलच्।) गहनः। इत्यमरः। ३। १। ८५। (यथा गीतायाम् २। ५२।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति"॥)
मिश्रः। इत्युणादिकोषः॥ (यथा भागवते ६। २। ४६।
"न यत्पुनः कर्म्मसु सज्जते मनो
रजस्तमोभ्यां कलिलं ततोऽन्यथा"॥)

कलिवृक्षः, पुं, (कलेराश्रयरूपो वृक्षः।) कलिद्रुमः। बहेडुकवृक्षः। इति हेमचन्द्रः॥

कली, स्त्री, (कल्+"सर्व्वधातुभ्य इन्" ततः वा ङीप्।) कलिका। इत्यमरटीकायां भरतः॥

कलुषं, क्ली, (कं सुखं लुषति हिनस्ति। क+लुष्+अण्। यद्वा कल्+"पृनहिकलिभ्य उषच्"। उणां ४। ७५। इति उषच्।) पापम्। इत्यमरः। १। ४। २८। (यथा शङ्कराचार्य्यकृतात्मबोधे ५।
"अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्म्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्"।
आविल्यं यथा ऋतुसंहारे। ३। २३।
"विगतकलुषमम्भः श्यामशष्पा धरित्री।
विमलकिरणचन्द्रं व्योम ताराविचित्रम्"॥)

कलुषः, पुं स्त्री, (कस्य जलस्य लुषः हिंसकः। आविलकारक इत्यर्थः। क+लुष्+क।) महिषः। इति राजनिर्घण्टः॥ (वाच्यवत्। यथा शकुन्तलायां "कण्ठः स्तम्भितवाष्पवृत्तिकलुषः"॥ निन्दितः। यथा मनुः १। ५७।
"वर्णापेतमविज्ञातं नरं कलुषयोनिजम्"॥)

कलुषः, त्रि, (कल्+उषच्।) अनच्छः। आविलः। इत्यमरः। १। १०। १४॥ ("निर्म्मलकलुषे नेत्रे" इति सुश्रुते उत्तरतन्त्रे। ३१ अध्याये॥)

कलेवरं, क्ली, (कले शुक्रे वरं श्रेष्ठं देहोत्पत्तिहेतुत्वात् पवित्रम्। सप्तम्या अलुक्।) शरीरम्। इत्यमरः। २। ६। ७०॥ (यथा गीतायाम्। ८। ६।
"यं यं भावं स्मरन् देही त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः"॥)

कल्कः, पुं क्ली, (कल् गतौ+"कृ दाधारार्चिकलिभ्यः कः"। उणां ३। ४०। इति कः।) घृततैलादिशेषः। (यथा याज्ञवल्क्यः। १। २७७।
"स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकम्।
गौरसर्षपकल्केन साज्येनोत्सादितस्य च"॥)
दम्भः। (यथा महाभारते १। १। २७१।
"तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्नकल्कः।
प्रसह्य वित्ताहरणं न कल्कः
तान्येव भावोपहतानि कल्कः"॥)
विभीतकवृक्षः। विष्ठा। किट्टम्। पापम्। इति मेदिनी॥ (यथा भागवते २। २। २४।
"विधूतकल्कोऽथ हरेरुदस्तात्
प्रयाति चक्रं नृप! शैशुमारम्"॥
यस्य कस्यचित् वस्तुनो चूर्णम्। यथा कुमारे। ७। ९।
"तां लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्"॥)
कल्कमलः। इति शब्दरत्नावली॥ तुरुष्कनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ घृततैलादिपाके देयमौषधद्रव्यम्। तत्तु मधुकषायान्तर्गतद्रवादि पेषितम्। अस्य पूर्व्ववीर्य्यं याममेकं तिष्ठति। यथा,—
"द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा जलमिश्रितम्।
तदेव सूरिभिः पूर्व्वैः कल्क इत्यभिधीयते"॥
तत्पर्य्यायः। पिष्ट २ विनीयः ३। इति रत्नमाला॥ आवापः ४ प्रक्षेपः ५। इति वैद्यकपरिभाषा॥
("द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्।
प्रक्षेपावापकल्कास्ते तन्मानं कर्षसम्मितम्॥
इति मध्यखण्डे। ५। १। शार्ङ्गधरेणोक्तम्॥ यत्तु व्रतेषूपयुज्यते सभूयः कल्क इति संज्ञां लभते निरुद्धालेपनसंज्ञस्तेनास्रावसंनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषतात्रणशुद्धिश्च भवति"॥ इति सुश्रुते सूत्रस्थाने। १८ अध्याये॥)
शाठ्यम्। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥

कल्कः, त्रि, (कल्कयति पापमाचरति। कल्क्+कः।) पापाशयः। पापात्मा। इति मेदिनी॥

कल्कफलः, पुं, (कल्कस्य विभीतकस्य फलमिव फलं यस्य अवयवसादृश्यात्।) दाड़िमवृक्षः। इति राजनिर्घण्टः॥ (दाड़िमशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कल्किः, पुं, (कल्कः पापं हार्य्यतया अस्ति अस्य। कल्क+इन्।) विष्णोर्दशमावतारः। स तु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे भविष्यति। यथा,—
"सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति"॥
तस्य कर्म्म यथा,—
"अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः।
असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥
विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति"॥
इति श्रीभागवतम्॥ तस्योत्पत्तिर्यथा,—
"स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्।
तं श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्॥
सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो कन्यायां त्वन्निदेशतः॥
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिक्षयम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥
इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति।
बृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्यैषा पद्मा नाम्नी जनिष्यति॥
यात यूयं भुवं देवाः स्वांशावतरणे रताः॥
राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि।
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्व्ववत्।
कलिव्यालं संनिरस्य प्रयास्ये स्वालयं विभो॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः॥
महीमास्थाय भगवान् निजजन्मकृतोद्यमः।
सम्भलग्रामविप्रर्षिमाविवेश परात्मकः॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्।
ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम्॥
सरित् समुद्रा गिरयो लोकाः सस्थाणुजङ्गमाः।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ॥
बभूव सर्व्वसत्त्वानामानन्दो विविधाश्रयः।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः॥
चक्रुर्व्वाद्यानि गन्धर्व्वा ननृतुश्चाप्सरोगणाः।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।
जातो ददृशतुः पुत्त्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाड़ीच्छेत्री तदम्बिका।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता॥
तस्य विष्णोरनन्तस्य वसुधाऽदात् पयः सुधाम्।
मातृका माङ्गल्यवचः कृष्णजन्मदिनेऽभवन्॥
ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ विचारितम्॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सुशीतः प्राह तरसा ब्रह्मणो वचनादृतः।
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु सम्भलग्रामे सोत्सवा जीवजातयः॥
मङ्गलाचारबहुलाः पापतापविवर्ज्जिताः।
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्॥
पूर्णकामा विप्रमुख्यानाहूयादाद्गवां शतम्।